# ।। किमपि समस्यानिर्धारणम् ।।

## (संस्कृतलघुनाटकम्)




शङ्करनारायणः

पूर्णवेदपुरी

# ।। श्रीरस्तु।।

**[प्रथमो रङ्गः]**

**केनेषितं जगदिदं निजवोधरूपं**

**केनैव पालितमथापि च लीयतेन्ते**

**कस्मिन्स नित्यनवनीरदकान्तियुक्तो**

**कल्याणमूर्तिरवदाद्भवसागराद्वः।।**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः- ( सभां विलोक्य) अहो मनीषिभिरलङ्कृते अस्मिन् परिषदि नविनेन वृत्तविचित्रगन्धिना नाटकेन रञ्जयितव्याः खलु सामाजिकाः। दुष्करे अस्मिन् कर्मणि चन्द्रप्रग्रहणाभिलाष्ण्याः मित्रसेनकुमार्याः मन इव मे मनो अपि दृढं लग्नः ।

( निष्क्रामति)

(इति स्थापना )

( कस्यचन अन्तःपुरस्य रङ्गः। एकस्मिन् मञ्चे कुमार्योका शेते। समीपे राजा मित्रसेनः राज्ञी वसुमतीदेवी च। उभौ विषादं नाटयतः। कुमारीं विलेक्य करुणं रुदतश्च)

(ततः प्रविशति कश्चन भटः)

भटः - जयतु महाराजः। अमात्यो धर्मशीलस्त्वद्दर्शनाय कांक्षते।

राजा - ननु प्रवेशयस्तम्।

भटः - यदाज्ञापयति महाराजः। ( निष्क्रम्य अमात्येन सह पुनरागच्छति।)

अमात्यः - ( राजानमुपसृत्य) जयतु महाराजः।(राज्ञः मुखमवलोक्य स्वगतम्। अद्य केन वा हेतुना आहूतोहं महाराजेन। सम्प्रति न बाह्यो आन्तरश्च पीडास्ति राज्ये सप्ताङ्गेषु च। तथापि राज्ञः मुखे कस्माद्धेतोः म्लानता सन्तापश्च दृश्यते। भवतु तंमेव पृच्छामि। (प्रकाशम्) महाराजन् हुंकारेणैव विनष्टारातिर्भवान् केन वा हेतुना माम् आहूतवान्। अपि च आदित्यकल्पमिदं ते मुखं कुतो राहुग्रस्तार्कमिव म्लायते।

राजा - जयसेन पश्यतामियं मे पुत्री ग्रीष्मोष्मतप्तनलिनीनालिकेव सन्ना शेते। यैषा किमपि नोच्यते न भुङ्क्ते कदापि न निद्राति च। अस्याः ईदृशीं दयनीयामवस्थां विलोकयतो मे हृदयं दलतीव। एषा हि-

**विमुच्य हारान् कटके विहाय विनापि हेतुं रुदती भृशं सा ।**

**अलक्षितेनाक्षियुगेन तारकाः निशकरं चार्तमना समीक्षते।।**

तत् तथाविधं क्रियतां येनेयं स्वस्था स्यात्।

अमात्यः - तथास्तु महाराजन्। (स्वगतम्) कृच्छ्रसाध्या हि एषा व्याधिः। तथापि कुमार्याः रोगशान्त्यै यथाशक्ति प्रयत्नः कार्यः। यौग्यैः भिषग्वरैः चिकित्सितव्यैषा। कस्तत्र योग्यो भिषग्वरः। (चिन्तां नाटयति ततः राजाभिमुखी भूत्वा प्रकाशम् ) राजन्। श्रुतं हि मया दक्षिणेषु अगस्त्यगोत्रजो कौमारतन्त्रनिपुणः जीवसिद्धिर्नामको भिषग्वर्यो वर्तततेति। तमाहूयताम्। तेन चिकित्सिते कुमारी अचिरादेव स्वस्था स्यात् इति मे मतिः।

राजा - शीघ्रमेव तमानय ।

अमात्यः - यदाज्ञापयति महाराजः। ( भटेन सह निष्क्रामति)

**[द्वितीयो रङ्गः]**

**(पूर्ववदेव रङ्गविधानम)**

भटः - ( प्रविश्य) जयतु महाराजः। महाराजाज्ञया भिषग्कत्नोत्तंसो जीवसिद्धिरानीतः।

महाराजः - ननु प्रवेशय तम्।

भटः - यदाज्ञायति महाराजः ( निष्क्रम्य पुनः भिषजा मन्त्रिणा च सहितो प्रवेशयति ) इतो एतो भवन्तौ।

अमात्यः - जयतु महाराजः। महाराजाज्ञयया आनीतो भिषग्रत्नोत्तंसो एष जीवसद्धिः।

महाराजः - (भिषजाभिमपखी भूत्वा) नमः वैद्यशास्त्रपारङ्गताय सकलवैद्यकुलमकुटमणये ते।

जीवसिद्धिः - स्वस्ति। आयुष्मान् भव।

अमात्यः - महाराजन्। भवदाज्ञया आनीतोयं वैद्यमणिः। अनन्तरं कार्यं विधीयताम्।

महाराजः - चिकित्सार्थं यद्यदनेन कल्प्यते तत्तदखिलं सम्प्रत्येव सज्जीक्रियताम्। (भटं प्रति) भद्रसेन

त्वमपि अस्मिन् कर्मणि मन्त्रिसहायो भव।

अमात्यः - यदाज्ञापयति महाराजः। (निष्क्रामति )

भटः - यदाज्ञापयति महाराजः। ( निष्क्रामति )

महाराजः - (भिषगभिमुखी भूत्वा) वैद्यशिखामणे, विशाखासहिता फाल्गुनीशुक्लपक्षपञ्चमी सम्प्रति वर्तते। तदस्मिन्नेव सन्मुहूर्ते आरभ्यतां कुमार्याः चिकित्सा।

जीवसिद्धिः - तथास्तु महाराजन्। ( कुमारीसमीपं गत्वा तामापादचूडं विलोक्य तस्याः नाडीस्पन्दादिकं निरीक्ष्य विषादं नाटयति)

राजा सोद्वेगः - भिषग्वर्य कीदृशीमवस्थामपन्ना इयं मे पुत्री । कथं वा एषा स्वस्था स्यात्।

जीवसिद्धिः - **भवरोगमहावैद्ये प्रतिकूले प्रवर्तिते।**

**कथं प्राकृतवैद्यानां नो क्रियाः सफलाः भवेत्।।**

तेनाहं प्रतिनिवर्त्तयामि। ईश्वरो रक्षत्वैनाम्। ( निष्क्रामति)

महाराजः - हा हतविधे । ईदृशीस्ते लीला। (उच्चैः क्रन्दति)

महाराज्ञी - हा विधे ( उच्चैः विलपति मोहमुपगता च)

अमात्य - ( झटिति प्रविश्य) समाश्वसतु समाश्वसतु महाराजन्। कुमारीचिकित्सायै उपायान्तराणि पश्यामः। नूनं सफलं स्यादस्माकं श्रमः। सम्प्रत्येव सभ्यै सहामन्त्रय युक्तं कार्यं कुर्मः। तद्भवान् सभागृहमलङ्करोतु अहमपि पुरोहितसेनापतिप्रमुखान् सभ्यानाहूय सम्प्रत्येव सन्निहितो भवामि।(निष्क्रामति)

राजा - ( समाश्वस्तो भूत्वा निश्वस्य ) तथा क्रियतां यदस्मिन् हितम् । ( राज्याः अभिमुखो भूत्वा ) प्रिये समाश्वस्ता भव। न विफला स्यात्तव प्रार्थना। ( निष्क्रामति)

[पश्चात्तले शोकमभिव्यञ्जयन् वेणुनादः (शुभपन्तुवराली रागः) ]

[**तृतीयो रङ्गः - कश्चन जनपदस्य रङ्गः**]

(काचन ग्रामसभा। द्वित्राः ग्रामीणवृद्धाः सम्भाषणे व्यग्रा सन्तस्तिष्ठन्तः। द्वित्राः स्त्रियश्च जलादानप्रतिनिवर्त्तनकर्मनिरताः इव तिष्ठन्त्यः)

(द्वौ राजभटौ प्रविशतः)

एकः भटः- ( विज्ञापनपत्रमेकं उन्नीय उच्चैः वाचयति ) भो भो महाजनाःश्रुण्वन्तु भवन्तः। इह खलु मित्रसेनकुमारी चन्द्रप्रग्रहणाभिलाषिणी भग्नमनोरथा सन् आतुरा सञ्जाता। सा यथा स्वस्था स्यात्तथा कुर्वतो भिषग्वराय शास्त्रविज्ञानिने पण्डिताय वा महाराजः सुवर्णशतं पञ्चगराणि च प्रदास्यति।

अपरः - ( पटहध्वानम् कृत्वा )

(द्वित्रिवारं विज्ञापनं उच्चैः वाचयित्वा निष्क्रामतः)

एकः ग्रामीणः - किमु भवन्तः महारजस्य विज्ञापनं श्रुतवन्तः।

ग्रामवृद्धेष्वन्यः - (सविषादं) राजकुमारी आतुरा जातेति। हा धिक्।

अपरः - यदि चिकित्सा सफला चेत् सुवर्णशतस्य पञ्चनगराणाञ्च लाभः स्यात् । अनवरता कीर्तिश्च ।

तृतीयः - वयमपि यथाशक्ति प्रयत्नं कुर्मः । तस्याः रोगशान्त्यै ईश्वरं प्रार्थयामश्च।

प्रथमः - एहि मित्राः ग्रामदेवस्य मन्दिरं गच्छामः।

(सर्वे निष्क्रामन्ति)

**[चतुर्थो रङ्गः]**

( अन्तःपुरस्य पश्चात्तलम् - राजा विषादं नाटयित्वा प्रकोष्ठे इतस्तो चलति। मध्ये मध्ये पुत्रीसमीपमेत्य तां विलोकयन् तिष्ठति च। राज्ञी सदा पुत्री परिचरणे व्यग्रेव वर्तते। )

( एको भटः प्रविशति)

भटः - जयतु महाराजः। कान्यकुब्जदेशात् शास्तृदत्ताख्यो सकलशास्त्रार्णपारङ्तः पदवाक्यप्रमाणवित् कश्चिद्विपश्चित् कुमारीचिकित्सायै सन्नद्धो आगतः। किमसौ प्रवेशाय दत्तानुमतिः।

राजा -अस्मिन्कार्ये इतोप्यनुमति देयः। शीघ्रं प्रवेशयस्तम्।

(भटः निष्क्रम्य पण्डितेन सह प्रविशति )

पण्डितः - जयतु महाराजः। कुमारीचिकित्सायै अधुनैव दीयतां मे अनुज्ञाम्। यतो हि -

**न कालगणना कार्या चिकित्सायै रणाय च।**

**मन्त्रणायापि पूजायै तथा श्राद्धाय धीमता ।।** इति स्मृतिकारवचनम्।

राजा - शीघ्रमारभ्यताम्।

( पण्डितः कुमारीसमीपं गत्वा तां विलोकयति। नाडीस्पन्दादिकं निरीक्षते।कुमारीं प्रति किमपि मन्त्रयित्वा राज्ञः समीपं आगच्छति )

पण्डितः - राजन् इयं व्याधिः मनोजन्या एव। रागमेव अस्य हेतु । तदुक्तं वाग्भटसंहितायां - रजस्तमशच मनसो द्वौ च दोषावुदाहृतौ।। इति। अतः.....( अर्धोक्तौ विरमति )

राजा - अतः किम् करणीयम्। पूर्णतया वदतु भवान्।

पण्डितः - अतः चन्द्रावाप्त्या एव अस्योपशमः। चन्द्रस्तु भूमेः एकादशयोजना दूरे वर्तते। तत्र कुमारीं नेतुं उपायः चिन्तनीयः।

राजा - ( ईषद्रोषं नाटयित्वा) किं भणसि त्वम्। चन्द्रमण्डलं प्रति गमनम्। असाध्यं तत्।

पण्डितः - राजन् व्योमशास्त्रविशारदः अहमित्यवधारय। तदर्थं विमानं कल्पयामि।

राजा - ( रुष्टः इव नाटयित्वा ) रे रे वाचाट निर्गच्छ शीघ्रं । नो चेत् मदीयरोषाग्निना नामावशिष्टः स्याः।

पण्डितः - ( भीतिं नाटयित्वा ) प्रसीदतु प्रसीदतु महाराजः। ( निर्गच्छति)

(राजा सविषादस्तिष्ठति। राज्ञी उच्चैः रुदति। रोदनशब्दं श्रुत्वा आगतः इव अमात्यःससम्भ्रमं प्रवेशयति)

अमात्यः - जयतु महाराजः। राजन् किमभवत्।शास्तृदत्तेन किमुक्तम्। कीदृशीमवस्थामापन्ना कुमारी।

राजा - किमु वक्तव्यम्। सकलमपि मदीयं विनष्टमिव मे भाति। ( विलपति मोहमुपगतश्च)

अमात्यः - राजन् समाश्वसतु समाश्वसतु। ( राज्ञः परिचर्यां करोति अनन्तरं राजानं समाश्वस्तं ज्ञात्वा ) राजन् नाहं वैद्यशास्त्रविचक्षणः न वा व्योमशास्त्रविशारदः। तथापि मदीयमन्दबुद्धौ यद्भाति तत्ते निवेदयामि। यदि रोचते

स्वीक्रियताम्।

राजा - कः सन्देहः वदतु भवान्।

अमात्यः - कुमार्याः अभिलाषो दुष्करमेवेति वयं जानीमः। किन्तु कुमार्या कीदृशश्चन्दः अभिलषितः इति वयं न जानीमः। अतः तदेव प्रथमतया ज्ञातव्यः।

राजा - ज्ञाते सति किं कुर्मः।

अमात्यः - प्रथमं तां पृच्छामः। अन्तरं किं करणीयमिति चिन्तयामः।

राजा - तर्हि भवानेव तां पृच्छतु सर्वम्।

अमात्यः - यदाज्ञापयति महाराजः। ( कुमारीसमिपं गच्छति। वत्से कथयमां सर्वम्। कुत्र त्वया दृष्टः सः चन्द्रः।

कीदृशोयं चन्द्रः। कियान्मात्रं स्थूलः। अहं तं गृदीत्वा तुभ्यं प्रदास्ये।

कुमारी - ( दीनस्वरेण ) तत्र ... मदीयशय्यागारस्य समीपे आम्रवृक्षः अस्ति किल। तस्योच्चतमश्शाखायां इयान्मात्रं चन्द्रं अपश्यम्। ( हस्तसंज्ञां करोति) तन्मह्यं दीयताम्।

अमात्यः - ( विहस्य ) इदानीमेव तुभ्यं प्रदास्ये। प्रसन्नचित्ता भव।

( राजा राज्ञी च विस्मितौ भूत्वा कुमारीं मन्त्रिणं च विलोकयतः)

राजा - अमात्य धर्मशील किमिदम्। कुतो हसति भवान्।

अमात्यः - ( राज्ञः समीपं उपेतेय) राजन् कुमारी हस्तग्राह्यपरिमितं चन्द्रमेव अभिलषति। अस्त्येको उपाय। तस्यै सुवर्णस्थालिकामेकां चन्द्र इति आरोप्य दीयताम्। सा नूनं तृप्ता स्यात्।

राजा - उत्तमः उपायः। किन्तु स्थालिकाप्रदानात् परमपि आकाशे चन्द्रं वीक्ष्य आतामानं एभिर्वञ्चिता अहमिति आत्मानं कल्पयति तर्हि ---- ( अर्धोक्तौ विरमति )

अमात्यः - अस्योत्तरं कुमार्या एव निर्धारयितव्यम्। तां एवं पृच्छावः। ( राज्ञः कर्णे किमपि मन्त्रयति )

( उभौ कुमारी समीपं गत्वा पृच्छतः)

अमात्यः - वत्ले अद्य रात्रौ अहं पूर्णचन्द्रं गृहीत्वा तुभ्यं दास्यामि। परन्तु अन्यस्मिन् दिने नूतनः चन्द्रः तत्स्थाने उदिष्यति। तस्यापि ग्रहणे यदि त्वं अभिलषसि चेत् विफलप्रयत्ना स्यामो वयम्।

राजकुमारी - संप्रति दृश्यमानं चन्दं अभिलषामि। तं ददातु। नूतने चन्द्रे न मे आग्रहः।

राजा - (सनिश्वासम्) अहो कृतार्थो अभवम्। रक्षितोहं त्वया।

अमात्यः - मैवं चिन्तय राजन्। कुमार्या एव प्रश्नस्यास्य निर्धारणो कृतः। वस्तुतः बालानां सरले मनसि न वर्तते कापि प्रहेलिका। तेषां समस्याः अस्मादृशैः वृद्धैः पिष्टपेषणं कृत्वा गौरवतमं क्रियन्ते। वयं वृद्धाः एव समस्याः वपन्ति संवर्धयन्ति च। किमपरन्ते करवाण्यहम्।

राजा - इतः परं किं सन्तुष्टिकरं मे वर्तते

अपि च,

**सर्वासान्तु समस्यानां मूलाद्बाह्ये न निष्कृतिः।।**

**अतःश्री सा जगद्धात्री तनोतु सुखमक्षयम् ।।**

**इति शम्**

*पूर्णवेदपुरवासिना कथा  शङ्करेण परिवर्त्य निर्मिता।*

*पूर्णवेदतनुः श्रीपतिः सदा रक्षतान्निखिलपापहारि नः।।*


**PREPARED BY**

**SANKARANARAYANAN.A**

**HSS TEACHER**

**GOVT.SANSKRIT HSS THRIPUNITHURA,RNAKULAM**